ISBN: 978-93-94449-23-7
(Peer-reviewed)

# Different Dimensions of Art, Culture and Education in Ancient India



Dept. of Education, History & Sanskrit (U.G. & P.G.)
in collaboration with I.Q.A.C.
**Sitananda College**
Nandigram, Purba Medinipur

**Editors**
Dr. Bhaswati Mukhopadhyay
Dr. Naba Kumar Das
Dr. Sarita Singh

**2023**

23. অভিজ্ঞানশকুন্তলম্ নাটকে প্রতিফলিত মূল্যবোধ শিক্ষা :
একটি বিশ্লেষণাত্মক আলোচনা
— পবিত্র ভট্টাচার্য 138

24. শিক্ষা ও শূদ্র : প্রাচীন ভারতীয় শিক্ষাব্যবস্থায় শূদ্রের অবস্থান
— পল্লব বৈরাগ্য 142

25. ভারত ও দক্ষিণ-পূর্ব এশিয়ার সাংস্কৃতিক যোগাযোগ :
একটি প্রত্নতাত্ত্বিক অনুসন্ধান
— পিয়াসী ব্যানার্জী 146

26. মৌর্য যুগের শিল্প ও স্থাপত্য
— মোয়াজ্জেম হোসেন 152

27. বৈদিক যুগ থেকে আধুনিক যুগে শিক্ষার প্রকৃতির পরিবর্তন :
একটি সমীক্ষা
— শম্পা সরকার 158

28. मुक्तदूरस्थशिक्षायाः विकासे भारतीयानुभवः
— अरुप प्रधान 163

29. संस्कृतसाहित्ये रसस्य स्थानविषये एका समीक्षा
— काञ्चन वारिक 169

30. भारतीयशिक्षणपद्धत्यां वैदिकशिक्षणपद्धत्याः प्रभावः
— जयश्री पाल 173

31. ड. यतीन्द्रविमलचतुर्धुरीणविरचितभारतहृदयारविन्दे नारीणामवदानम्
— टोटन भौमिक 177

32. प्रबोधचन्द्रोदयालोके मानवमुक्तिः
— डः पूर्णिमा जाना 184

33. अलंकारनिरूपणे मम्मटविश्वनाथमतयोः तुलनामूलकं समीक्षात्मकमालोचनम्
— डः सोनाली मुखोपाध्याया 195

34. वैदिकजीवनदर्शने महायज्ञानां महत्त्वम्
— सुलोचन राना 202

# अलंकारनिरूपणे मम्मटविश्वनाथमतयोः तुलनामूलकं समीक्षात्मकमालोचनम्

डः सोनाली मुखोपाध्याया*

**⊙भूमिका –**

प्राचीनभारते कस्मिन् समयेऽलंकारशास्त्रस्योद्भवो जात सम्यक् ज्ञातुं न शक्यते। सुप्राचीनकालात् काव्यरचनायामलंकारस्य वहुलव्यवहारो दृश्यते। भारतीयानां सर्वाधिकं प्राचीनं साहित्यं तावद् वैदिकसाहित्यम्। वैदिकसाहित्यपाठाय षढविधानां वेदाङ्गानां समुल्लेखो दृश्यते। तदुक्त पतञ्जलिकृते महाभाष्ये – 'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च'[1]।

कौटिलीयेऽर्थशास्त्रेऽप्युक्तम् – 'शिक्षा कल्पो व्याकरणं निरुक्तं छन्दोविचितिर्ज्योतिषमिति चाङ्गानि'।[2]

वेदपाठाय अलंकारशास्त्रस्य समुल्लेखो न दृश्यते। किं तर्हि वेदपाठाय अलंकारशास्त्रस्य प्रयोजनं न विद्यते? वेदेऽपि बहवोऽलंकाराः प्रयुक्ता दृश्यन्ते। यथा अग्निसूक्तस्य नवममन्त्रे –'स न पितेव सूनवे ......' इत्यत्र उपमालंकारः। (ऋग्वेद १/१/९) रात्रीसूक्ते यथा – 'आद्रात्री वासस्तनुते सिमस्मै ......' इत्यत्र समासोक्तिरलंकारः। (ऋग्वेद १/१२५/४) अपि च – "द्वा सुपर्णा सयुजा सखायां..." इत्यत्र अतिशयोक्तिश्च प्रयुक्ता दृश्यन्ते।[3]

अतो वेदपाठाय अलंकारशास्त्रस्य अवश्यमेव प्रयोजनं विद्यते। विषयेऽस्मिन् काव्यमीमांसाकारराजशेखरेण एवोक्तम् – 'उपकारकत्वादलंकारः सप्तममङ्गंम्, ऋते च तत्स्वरूपज्ञानाद् वेदार्थानवगतेः'।[4] यथा वा भवतु वैदिकसाहित्ये कस्यापि अलंकारग्रन्थस्य नाम न प्राप्यते।

**⊙अलंकारशास्त्रस्य प्राथमिको वृतान्तः –**

कस्मिंश्चिद् शास्त्रे आलोचितं वियमवलम्व्य नामकरणं भवतीति प्रथा। यथा व्याकरणमूलकं विषयमधिकृत्य व्याकरणशास्त्रम्। न्यायमूलकं विषयमधिकृत्य न्यायशास्त्रम्। अतः काव्यमूलकं रसालंकार-गुणादिविषयमवलम्व्य यद् शास्त्रं प्रवत्तते, तस्य नाम काव्यशास्त्रं काव्यमीमांसाशास्त्रं वा भवितुमर्हति। कथं तर्हि अलंकारशास्त्रमिति नाम? शास्त्रेऽस्मिन् न केवलमलंकार एव विषयः, रसगुणादीनामपि विवेचनमत्र दृश्यते। तस्मादलंकारशास्त्रमिति नाम कथं युज्यते? अत्र तु सम्प्रधार्यमिदम्। भामहोद्भटवामनादिभिः चिरन्तनैः काव्यमीमांसाकारैः काव्ये अलंकारस्यैव सारभूतत्वं प्राधान्यञ्च प्रतिपादितम्। अलंकारप्राधान्यादेव काव्यमीमांसाशास्त्रस्य अलंकारशास्त्रमिति नाम आदितः सञ्जातम्, पश्चात्तु इदं प्रथा प्राप्तम्।

---

♦सहायकाचार्या, संस्कृतविभागः, सेवाभारतीमहाविद्यालयः, झाड़ग्राम।

विषयेऽस्मिन् काव्यालंकारसूत्रवृत्तिटीकाकारस्य गोपेन्द्रत्रिपुरहरस्य मन्तव्यमवधार्यम् – "योऽयमलंकारः काव्यग्रहणहेतु त्वेनोपन्यस्यते, तद् व्युत्पादकत्वाच्छास्त्रमप्यलंकारनाम्ना व्यपदिश्यते इति शास्त्रस्यालंकारत्वेन प्रसिद्धिः प्रतिष्ठिता स्यादिति"।[5]

यद्यपि साहित्यविद्याया उत्पत्तिनिरुपणप्रसङ्गेण राजशेखरेण बहूनामाचार्याणामुल्लेखः कृतस्तथापि तेषां ग्रन्था न समुपलभ्यन्ते। तदुक्तं राजशेखरेण – "रीतिनिर्णयं सुवर्णाभः, अनुनासिकं प्रचेतायनः, यमकानि चित्रं चित्राङ्गदः, शब्दश्लेषं श्लेषः, वास्तवं पुलस्त्यः, उपम्यमौपकायनः, अतिशयं पाराशरः अर्थश्लेषमुतथ्यः, उभयालंकारिकं कुवेरः, वैनोदिकं कामदेवः, रूपकनिरुपनीयं भरतः"।[6]

अत्रेदं सम्प्रधार्यं यद् अलंकारशास्त्रस्य सर्वप्रथमः ग्रन्थो भरतविरचितं नाट्यशास्त्रम्। तदनन्तरं च भामहोद्भटरुद्रटवामनादीनां ग्रन्थाः विरचिताः। अयमेव संक्षेपतोऽलंकारशास्त्रस्य प्राथमिको वृत्तान्तः।

**⊙अलंकारलक्षणम् –**

अधुना को नामालंकार इति प्रश्नः समुदेति। साधारणदृष्ट्या भूषणार्थकालं शब्दादनन्तरं कृ-धातोर्घञ्-प्रत्ययेनालंकारशब्दो निष्पन्नः। एतेन येन तावत् काव्यमलंकृतं भवति स एवालंकारः। भरतेनोक्तम् – "भूषणैरिव विन्यस्तैस्तद्भूषणमिति स्मृतम्"।[7] मानवदेहे अलंकारविन्यासवत् काव्यशरीरेऽपि अलंकारविन्यासो भवति। नाट्यशास्त्रे चत्वार एवालंकारा नामतः परिकीर्तिताः। यथा – उपमा, दीपकं, रुपकं यमकञ्च। तदुक्तं –

"उपमा दीपकञ्चैव रूपकं यमकं तथा।
काव्यस्यैते ह्यलंकाराश्चत्वारः परिकीर्तिता"॥[8]

उपमादीपकरूपकग्रहणेन उपम्यमूलानां सर्वेषामर्थालंकाराणां ग्रहणम्। अभिनवगुप्तेन उक्तं यद् –

"उपमालक्षणं चैतद् वैचित्र्यान्तराणाम्। ...उपमाप्रपञ्चश्च सर्वोऽलंकार इति विद्वद्भिः प्रतिपन्नमेव"।[9] यमकेन तु शब्दालंकाराणां ग्रहणम्। पुनरपि अभिनवगुप्तेनोक्तं –

"शब्दाभ्यासस्तु यमकमिति, तुरर्थालंकारेभ्यो व्यातिरेकमाह.... तेनानुप्रासलाटीयादेरनेनैवोपसंग्रहः"।[10]

भामहेनोक्तमलंकारलक्षणप्रसङ्गे – "वक्राभिधेयशब्दोक्तिरिष्टा वाचामलंकृति"।[11] भामहमते वक्रोक्तिरेवालंकारस्य प्राणभूता। वक्रोक्तिं विना नालंकारता। परन्तु तन्मते वक्रोत्त्यतिशयोत्त्योः कोऽपि भेदो नास्ति। भामहेनाप्यलंकारस्य द्विधा विभागः स्वीकृत इत्यवगम्यते। भेदविषये तेनोक्तम् –

"अनुप्रासः सयमको रूपकं दीपकोपमे।
इति वाचमलंकाराः पञ्चधैवान्यैरुदाहृताः"॥[12]

अनुप्रासयमकाभ्यां शब्दालंकाराणां रूपकोपमदीपकैरर्थलंकाराणां परामर्शोति बोध्यम्। दण्डिना तु अलंकारसाधारणलक्षणं कृतम्। काव्यादर्शे तेनोक्तम् –

"काव्यशोभाकरान् धर्मानलंकारान् प्रचक्षते"।[13]

दण्ड्याचार्यो मार्गवादी। तन्मते मार्गविभाजका गुणा उपमादयः पारिभाषिकालंकाराश्च साधारणालंकाराः। अर्थाद् गुनालंकारयोः कोऽपि मौलिकभेदं न स्वीकरोति दण्डी। तन्मते उभावेव काव्यस्य शोभासम्पादकौ धर्मौ। अतस्तेन गुणोऽलंकाररूपेणोल्लिखितः। तेन शब्दार्थभेदेनालंकाराणां द्वैविध्यं स्वीकृतम्। तथा हि काव्यादर्शग्रन्थे